http://www.a2zSubjects.com

# MP BOARD CLASS 10 PAPER 2014

## संस्कृत (सामान्य) : कक्षा X

समय : घण्टात्रयम् ] [ पूर्णांक : १००

प्रश्न १. उचितविकल्पं चित्वा लिखत— १ × ५ = ५

(क) विसर्गसन्धिः अस्ति—

(अ) पवनः (ब) उच्चारणम्

(स) मनोरथः (द) सदैव।

(ख) 'दिग्गजः' इत्यस्मिन् पदे सन्धिः अस्ति—

(अ) गुणसन्धिः (ब) दीर्घसन्धिः

(स) विसर्गसन्धिः (द) व्यंजनसन्धिः।

(ग) यण् सन्धेः उदाहरणमस्ति—

(अ) हिमालयः (ब) इत्यादि

(स) गणेशः (द) नयन।

(घ) 'जगदीशः' इत्यस्य पदस्य सन्धिविच्छेदः अस्ति—

(अ) जगत् + ईशः (ब) जग + दीशः

(स) जगत + इशः (द) जग + ईशः।

(ङ) अधोलिखितेषु अव्ययं नास्ति—

(अ) अत्र (ब) तत्र

(स) कुत्र (द) पुत्रः।

उत्तर—(क) (स), (ख) (द), (ग) (ब), (घ) (अ), (ङ) (द)।

प्रश्न २. (क) 'पीताम्बरः' इत्यस्मिन् पदे समासः भवति— १ × ५ = ५

(अ) द्विगुः (ब) द्वन्द्वः

(स) कर्मधारयः (द) बहुव्रीहिः।

(ख) तत्पुरुषसमासस्य उदाहरणम् अस्ति—

(अ) प्रतिवर्षम् (ब) चौरभयम्

(स) नवरात्रम् (द) पितरौ।

(ग) 'हरिहरौ' इत्यस्य समासविग्रहः भवति—

(अ) हरिश्च हरश्च (ब) हरिः हरौ च

(स) हरि च हरौ (द) हरि च हरौ च।

(घ) 'प्राचार्यः' इत्यस्मिन् पदे उपसर्गः अस्ति—

(अ) प्रा (ब) प्रति

(स) प्र (द) प्राच्।

(ङ) अधोलिखितेषु उपसर्गः अस्ति—

http://www.a2zSubjects.com

(अ) अस् (ब) इव

(स) अद्य (द) सम्।

उत्तर—(क) (द), (ख) (ब), (ग) (अ), (घ) (स), (ङ) (द)।

प्रश्न ३. (क) 'पास्यति' इत्यस्मिन् पदे लकारः अस्ति— १ × ५ = ५

(अ) लोट्लकारः (ब) लृट्लकारः

(स) लट्लकारः (द) लङ्लकारः।

(ख) 'नेष्यामः' इत्यस्मिन् पदे धातुः अस्ति—

(अ) नेष्य (ब) नेस्

(स) नेष् (द) नी।

http://www.a2zSubjects.com

http://www.a2zSubjects.com

http://www.a2zSubjects.com

(ग) 'अभवत्' इत्यस्मिन् पदे पुरुषः अस्ति—
(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः
(स) उत्तमपुरुषः (द) आदिपुरुषः।

(घ) 'घ्नन्ति' इत्यस्मिन् पदे वचनम् अस्ति—
(अ) एकवचनम् (ब) द्विवचनम्
(स) बहुवचनम् (द) मृदुवचनम्।

(ङ) 'सदाचारः एव परमोधर्मः' अस्मिन् वाक्ये अव्ययम् अस्ति—
(अ) परम (ब) एव
(स) सदाचारः (द) धर्मः।

उत्तर—(क) (ब), (ख) (द), (ग) (अ), (घ) (स), (ङ) (ब)।

प्रश्न ४. (क) 'क्तवतु' प्रत्ययस्योदाहरणम् अस्ति— १ × ५ = ५
(अ) पठितव्यम् (ब) पठितवान्
(स) पठनीयम् (द) पठितुम्।

(ख) 'सर्व + त्रल्' इत्यस्य पदम् भविष्यति—
(अ) सर्वत्र (ब) सर्वम्
(स) सर्वत्रल् (द) सर्वल्।

(ग) 'सेवमानः' इत्यस्मिन् पदे प्रत्ययः अस्ति—
(अ) तुमुन् (ब) क्त्वा
(स) शानच् (द) शतृ।

(घ) 'बालिका' इत्यस्मिन् पदे प्रत्ययः अस्ति—
(अ) टाप् (ब) ङाप्
(स) जाप् (द) आप्।

(ङ) पठतो ........................ मूर्खत्वम्।
(अ) भवति (ब) अस्ति
(स) नास्ति (द) विद्यते।

उत्तर—(क) (ब), (ख) (अ), (ग) (स), (घ) (अ), (ङ) (स)।

प्रश्न ५. प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत— १ × ५ = ५
(*नादेशे, स्मरन्तु, सत्ये, श्रेष्ठः, लघुत्वम्*)

(क) ज्येष्ठः .................... कुले लोके।

http://www.a2zSubjects.com

(ख) सर्वं .................... प्रतिष्ठितम्।
(ग) परसदननिविष्टः को .................... न याति।
(घ) न नक्तं .................... चरेत्।
(ङ) पुरातनं स्वपौरुषं .................... वीर बन्धवः।

उत्तर—(क) श्रेष्ठः, (ख) सत्ये, (ग) लघुत्वम्, (घ) नादेशे, (ङ) स्मरन्तु।

प्रश्न ६. अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत— ४
(क) महाभारतस्य प्रणयनं केन कृतम् ?
(ख) भारतीयैकता साधकं किम् ?
(ग) वरतन्तु शिष्यः कः आसीत् ?
(घ) आत्महिताय किम् अनुष्ठेयम् ?
(ङ) सिद्धार्थस्य पुत्रः कः आसीत् ?
(च) कर्मानुसारिणी का ?

उत्तर—(क) वेदव्यासेन, (ख) संस्कृतम्, (ग) कौत्सः, (घ) सद्वृत्तम्, (ङ) राहुलः, (च) बुद्धिः।

http://www.a2zSubjects.com

http://www.a2zSubjects.com

http://www.a2zSubjects.com

प्रश्न ७. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत— ६

(क) ब्राह्मणपरिवार: केन समासादित: ?

(ख) दयानन्दस्य जन्मनाम किम् आसीत् ?

(ग) मे मन: किम् अस्तु ?

(घ) सर्वप्राचीनाभाषा का अस्ति ?

(ङ) किं न अति पाठयेत् ?

प्रश्न ८. अधोलिखितेषु द्वयो: शब्दयो: शब्द-रूपाणि त्रिषु वचनेषु लिखत— २

(क) कवि:—चतुर्थी विभक्ति:

(ख) रमा—पञ्चमी विभक्ति:

(ग) युष्मद्—द्वितीया विभक्ति:

| | | | |
|---|---|---|---|
| उत्तर—(क) | कवये | कविभ्याम् | कविभ्य:। |
| (ख) | रमाया: | रमाभ्याम् | रमाभ्य:। |
| (ग) | त्वाम् | युवाम् | युष्मान्। |

प्रश्न ९. 'तस्य' अथवा 'साधुभि:' इति पदस्य विभक्तिं वचनं च लिखत। २

उत्तर—तस्य—षष्ठी विभक्ति: एकवचनं च।

साधुभि:—तृतीया विभक्ति: बहुवचनं च।

प्रश्न १०. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत—१०

(क) वरुणदेव: वृष्टिं वर्षति। सूर्यदेव: प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता अस्ति। वायु: अनिलं ददाति। ते सर्वे वृक्षं पालयन्ति पोषयन्ति रक्षन्ति च। ते न कदापि 'मम अधिकार: वर्तते' इति अवदन्। ते सर्वे परोपकारिण:। परं यूयं सर्वे परोपकारिण: वृक्षस्य साहाय्यं स्वीकृत्य तमेव नाशयितुं कृतसङ्कल्पा यूयं स्वाश्रयमेव नाशयथ। अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गमिष्यथ।

प्रश्न:—(i) क: वृष्टिं वर्षति ?

(ii) सूर्यदेव: किं प्रयच्छति ?

(iii) का वृक्षस्य आधारभूता अस्ति ?

(iv) क: अनिलं ददाति ?

(v) के परोपकारिण: ?

(ख) सूर्यवंशस्य राजा सगर: आसीत्। स: एकदा अश्वमेधयागं कृतवान्। यागस्य अन्ते यागस्य अश्व: यत्र-तत्र सञ्चारं कृतवान्। अश्वमेधं कृत्वा सगर: स्वयम् इन्द्र: भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् स: यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्। तत: अश्वं ग्रहीत्वा पाताललोके कपिलमुने: पुरत: स्थापितवान्। तदा मुनि: तप: कुर्वन् ध्याने आसीत्। अत: स: किमपि न ज्ञातवान्।

प्रश्न:—(i) सूर्यवंशस्य राजा क: आसीत् ?

(ii) स: एकदा किं कृतवान् ?

(iii) यागस्य अश्व: कुत्र सञ्चारं कृतवान् ?

(iv) क: यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान् ?

(v) इन्द्र: अश्वं गृहीत्वा पाताललोके कस्य पुरत: स्थापितवान् ?

(ग) 'बुन्देलकेसरी' इति विख्यातस्य छत्रसालस्य जन्म (1649) एकोन पञ्चाशदुत्तरषोडशशततमे ईस्वीये मध्यप्रदेशस्य 'टीकमगढ़' जनपदस्य मयूरपर्वतीय क्षेत्रे वर्तमानलिधौराविकासखण्डे 'ककरकचनय ग्रामे' अभवत्। छत्रसालस्य मातुर्नाम सारन्धादेवी पितुर्नाम च श्री चम्पतराय: इत्यासीत्। अयं वीर: बाल्यकालादेव भारतमातरं मुगलशासनात् विमोक्तुं प्रयतते स्म।

प्रश्न:—(i) 'बुन्देलकेसरी' इति नाम्ना क: विख्यात: आसीत् ?

(ii) छत्रसालस्य जन्म कदा अभवत् ?

(iii) मध्यप्रदेशस्य कस्मिन् जनपदे ग्रामे च छत्रसालस्य जन्म अभवत् ?

(iv) छत्रसालस्य पितु: नाम लिखत।

(v) अयं वीर: बाल्यकालादेव कां मुगलशासनात् विमोक्तुं प्रयतते स्म ?

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com

http://www.a2zSubjects.com

प्रश्न ११. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत—१०

(क) *गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।*
*पापं तापं च दैन्यं च घ्नन्ति सन्तोमहाशया:॥*

प्रश्न—(i) का पापं हन्ति ?

(ii) शशी किं करोति ?

(iii) कल्पतरु: किं हन्ति ?

(iv) पापं तापं दैन्यं च के घ्नन्ति ?

(v) 'पापम्' इति शब्दस्य विलोमपदं लिखत।

(ख) *सत्येन धार्यते पृथ्वी सत्येन तपते रवि:।*
*सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥*

प्रश्न—(i) रवि: केन तपते ?

(ii) पृथ्वी केन धार्यते ?

(iii) वायु: केन वाति ?

(iv) सर्वं केन प्रतिष्ठितम् ?

(v) 'धार्यते' इति पदे का धातु: अस्ति ?

(ग) *मत्ता गजेन्द्रा मुदिता गवेन्द्रा*
*वनेषु विक्रान्ततरा मृगेन्द्रा:।*
*रम्या नगेन्द्रा निभृता नरेन्द्रा:*
*प्रक्रीडितो वारिधरै: सुरेन्द्र:॥*

प्रश्न—(i) मत्ता: के ?

(ii) गवेन्द्रा: कीदृशा: भवति ?

(iii) वनेषु विक्रान्तरा: के ?

(iv) के निभ्रता: सन्ति ?

(v) सुरेन्द्र: कै: सह प्रक्रीडित: ?

प्रश्न १२. युग्ममेलनं कुरुत— ४

| 'अ' | 'ब' |
|---|---|
| (क) मन: ज्योतिषाम् | (i) वृद्ध: |
| (ख) द्विजश्रेष्ठ: | (ii) वृक्ष: |
| (ग) समयस्य सदुपयोग: | (iii) एकं ज्योति: |
| (घ) प्रकृतिदत्त: वर: | (iv) कर्त्तव्य: |

उत्तर—(क) → (iii), → (ख) → (i), (ग) → (iv), (घ) → (ii)।

प्रश्न १३. शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत— ४

(क) कुबेर: रघुं धनं दत्तवान्।

(ख) वृक्षाणां छेदनं महत् पापम्।

(ग) मानवशरीरं देवदुर्लभवम् नास्ति।

(घ) वैदिककाले नारी शिक्षिता आसीत्।

उत्तर—(क) आम्, (ख) आम्, (ग) न, (घ) आम्।

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत। ४

प्रश्न १५. स्वप्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत। ४

*अथवा*

स्वस्य मित्रस्य कृते अध्ययनं वर्णयन् एकं पत्रं संस्कृते लिखत।

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com

http://www.a2zSubjects.com

प्रश्न १६. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया— ५

(क) एकः बालिका पठति।

(ख) भवान् कुत्र गच्छसि ?

(ग) श्री रामं नमः।

(घ) सर्वे बालकाः धावति।

(ङ) जलस्य विना जीवनं नास्ति।

(च) मम दुग्धं रोचते।

प्रश्न १७. अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत— ५

(i) ततः वासुदेवः रामनाथपुरं प्राप्त रामदेवस्य गृहम् अगच्छत्।

(ii) गङ्गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।

(iii) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान्।

(iv) वासुदेवः तस्य प्रिय शिष्यः आसीत्।

(v) किञ्चिदग्रे गतः वासुदेवः कञ्चित् देवालयम् अपश्यत्।

उत्तर—(ii) → (iv) → (v) → (iii) → (i).

प्रश्न १८. अधोलिखितम् अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत— ५

सतां सज्जनानां, सङ्गतिः, सम्पर्कः, संसर्गो वा सत्सङ्गतिः इति कथ्यते। वस्तुतः सत्सङ्गात् एव मानवः समुन्नतो भवति। सज्जनानां संसर्गेण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने एवोक्तं "संसर्गजा दोषगुणा भवन्ति" इति। अतः स्वसमुन्नतिं इच्छता जनेन सर्वदा सतामेव सङ्गतिः विधेया।

प्रश्नाः— (i) अस्य गद्यांशस्य शीर्षकं लिखत।

(ii) केन जनः सज्जनः भवति ?

(iii) स्वसमुन्नतिम् इच्छता जनेन किं करणीयम् ?

(iv) अस्य गद्यांशस्य सारं लिखत।

(v) 'दुर्जनः' शब्दस्य विलोमशब्दं लिखत।

प्रश्न १९. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत— १०

(क) उत्सवः,

(ख) संस्कृतभाषायाः महत्त्वम्,

(ग) मम दिनचर्या,

(घ) छात्रजीवनम्।

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com